श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकचत्वारिंशः सर्गः ॥

## कुबेरप्रहितस्य पुष्पकविमानस्यागमनं श्रीरामेण पूजितस्यानुगृहीतस्य च तस्य तिरोभावो भरतेन रामराज्यस्याद्भुतप्रभावाणां वर्णनम्

विसृज्य च महाबाहुर्ऋक्षवानरराक्षसान्।
भ्रातृभिः सहितो रामः प्रमुमोद सुखं सुखी ॥ **7.41.1** ॥

अथापराह्णसमये भ्रातृभिः सह राघवः।
शुश्राव मधुरां वाणीमन्तरिक्षान्महाप्रभुः ॥ **7.41.2** ॥

सौम्य राम निरीक्षस्व सौम्येन वदनेन माम्।
कुबेरभवनात् प्राप्तं विद्धि मां पुष्पकं प्रभो ॥ **7.41.3** ॥

तव शासनमाज्ञाय गतोऽस्मि भवनं प्रति।
उपस्थातुं नरश्रेष्ठ स च मां प्रत्यभाषत ॥ **7.41.4** ॥

निर्जितस्त्वं नरेन्द्रेण राघवेण महात्मना।
निहत्य युधि दुर्धर्षं रावणं राक्षसेश्वरम् ॥ **7.41.5** ॥

ममापि परमा प्रीतिर्हते तस्मिन् दुरात्मनि।
रावणे सगणे चैव सपुत्रे सहबान्धवे ॥ **7.41.6** ॥

स त्वं रामेण लङ्कायां निर्जितः परमात्मना।
वह सौम्य तमेव त्वमहमाज्ञापयामि ते ॥ **7.41.7** ॥

परमो ह्येष मे कामो यत् त्वं राघवनन्दनम्।
वहेर्लोकस्य संयानं गच्छस्व विगतज्वरः॥ **7.41.8** ॥

सोऽहं शासनमाज्ञाय धनदस्य महात्मनः।
त्वत्सकाशमनुप्राप्तो निर्विशङ्कः प्रतीच्छ माम्॥ **7.41.9** ॥

अधृष्यः सर्वभूतानां सर्वेषां धनदाज्ञया।
चराम्यहं प्रभावेण तवाज्ञां परिपालयन्॥ **7.41.10** ॥

एवमुक्तस्तदा रामः पुष्पकेण महाबलः।
उवाच पुष्पकं दृष्ट्वा विमानं पुनरागतम्॥ **7.41.11** ॥

यद्येवं स्वागतं तेऽस्तु विमानवर पुष्पक।
आनुकूल्याद् धनेशस्य वृत्तदोषो न नो भवेत्॥ **7.41.12** ॥

लाजैश्चैव तथा पुष्पैर्धूपैश्चैव सुगन्धिभिः।
पूजयित्वा महाबाहू राघवः पुष्पकं तदा॥ **7.41.13** ॥

गम्यतामिति चोवाच आगच्छ त्वं स्मरे यदा।
सिद्धानां च गतौ सौम्य मा विषादेन योजय॥ **7.41.14** ॥

प्रतिघातश्च ते मा भूद् यथेष्टं गच्छतो दिशः।
एवमस्त्विति रामेण पूजयित्वा विसर्जितम्॥ **7.41.15** ॥

अभिप्रेतां दिशं तस्मात् प्रायात् तत् पुष्पकं तदा।
एवमन्तर्हिते तस्मिन् पुष्पके सुकृतात्मनि॥ **7.41.16** ॥

भरतः प्राञ्जलिर्वाक्यमुवाच रघुनन्दनम्।
विबुधात्मनि दृश्यन्ते त्वयि वीर प्रशासति॥ **7.41.17** ॥

अमानुषाणि सत्त्वानि व्याहृतानि मुहुर्मुहुः।
अनामयश्च मर्त्यानां साग्रो मासो गतो ह्ययम्॥ **7.41.18** ॥

जीर्णानामपि सत्त्वानां मृत्युर्नायाति राघव।
अरोगप्रसवा नार्यो वपुष्मन्तो हि मानवाः॥ **7.41.19** ॥

हर्षश्चाभ्यधिको राजञ्जनस्य पुरवासिनः।
काले वर्षति पर्जन्यः पातयन्नमृतं पयः॥ **7.41.20** ॥

वाताश्चापि प्रवान्त्येते स्पर्शयुक्ताः सुखाः शिवाः।
ईदृशो नश्चिरं राजा भवेदिति नरेश्वरः॥ **7.41.21** ॥

कथयन्ति पुरे राजन् पौरजानपदास्तथा।
एता वाचः सुमधुरा भरतेन समीरिताः।
श्रुत्वा रामो मुदा युक्तो बभूव नृपसत्तमः॥ **7.41.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकचत्वारिंशः सर्गः॥